# अध्यायः १
# अर्जुनविषादयोगः

श्लोकः १

धृतराष्ट्र उवाच (जनमेजयमाह वैशम्पायनः धृतराष्ट्र उवाच इति) (उवाच पप्रच्छ इत्यर्थः, सञ्जयमिति शेषः)

**धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।**

**मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय।। १ ।।**

धृतराष्ट्रः उवाच - धर्मक्षेत्रे कुरुक्षेत्रेयुयुत्सवः (सन्तः) समवेताः मामकाः पाण्डवाः च किम् एव अकुर्वत?

धृतराष्ट्रः *dhṛtarāṣṭraḥ* — *Dhṛtarāṣṭra*; उवाच *uvāca* — said ;
सञ्जय *sañjaya* — Oh! *Sañjaya*!; धर्मक्षेत्रे *dharma-kṣetre* — at the place where *dharma* resides; कुरुक्षेत्रे[1] *kuru-kṣetre* — at *Kurukṣetra*; समवेताः *samavetāḥ* — those who have assembled; युयुत्सवः *yuyutsavaḥ* — desiring to fight; मामकाः *māmakāḥ* — my people; पाण्डवाः *Pāṇḍavāḥ* — *Pāndu's* sons; च *ca* — and; एव *eva* — indeed; किम् *kim* — what; अकुर्वत *akurvata* — did they do

Dhṛtarāṣṭra said:

Oh Sañjaya! What indeed did my people and the Pāṇḍavas do, assembled at Kurukṣhetra, the abode of *dharma*, desiring to fight?

आनन्दगिरि

एवं गीताशास्त्रस्य साध्यसाधनभूतनिष्ठाद्वयविषयस्य परापराभिधेयप्रयोजनवतो व्याख्येयत्वं प्रतिपाद्य व्याख्यातुकामः शास्त्रं तदेकदेशस्य प्रथमाध्यायस्य द्वितीयाध्यायैकदेशसहितस्य तात्पर्यमाह -- **अत्र चेति।** गीताशास्त्रे प्रथमाध्याये प्रथमश्लोके कथासंबन्धप्रदर्शनपरे स्थिते सतीति यावत्। तत्रैवमक्षरयोजना -- **धृतराष्ट्र उवाचेति।** धृतराष्ट्रः हि प्रज्ञाचक्षुर्बाह्यचक्षुरभावाद् बाह्यमर्थं प्रत्यक्षयितुमनीशः सन् अभ्याशवर्त्तिनं सञ्जयमात्मनो हितोपदेष्टारं पृच्छति - धर्मक्षेत्रे इति। धर्मस्य तद्वृद्धेश्च क्षेत्रमभिवृद्धिकारणं यदुच्यते कुरुक्षेत्रमिति तत्र समवेताः सङ्गताः युयत्सवः योद्धुकामाः ते च केचिन्मदीयाः

---

[1] *Kurukṣetra* exists even today between Delhi and Ambala. Then great King Kuru, the founder of the Kuru dynasty, performed great tapas here. It is said that once when he was ploughing the land with a golden plough, Lord Indra came down and asked what he was doing. When the king told him that he was sowing the seed of *dharma*, Lord Indra gave him the boon that the seed of *dharma* sown there would grow for ever.

दुर्योधनप्रभृतयः पाण्डवाश्च अपरे युधुष्ठिरादयः ते च सर्वे युद्धभूमौ संगताः भूत्वा किमकुर्वत। कृतवन्तः।। १ ।।

शतजन्मकोटिसुकृतपुण्यविशेषशरीरमाद्यं खलु धर्मसाधनम्। दैवी संपत्ति  आसुरसंपत्ति

- व्यासप्रसादलब्ध-दिव्यचक्षुषा उत्कर्षेण वर्त्तते इति सञ्जयः। तादृशस्य तव न किञ्चित् अविदितमस्ति इत्यतः मत्पुत्रेषु पाण्डवेषु च यद्यद्वृत्तं तत्सर्वं वक्तुमर्हसि इति हेतुगर्भम् इदं विशेषणम्। रागद्वेषादि-दोषान् जितवानसि इति कृत्वा निर्व्याजमेव कथनीयं त्वया इत्यपि सूचितम्।
- (ननु अत्र युयुत्सवः इति विशेषणबलेन  समवेतानां तेषां कर्त्तव्यं कार्यं युद्धमेवेति युद्धस्यैव कर्त्तव्यत्वे प्रतीयमाने कथं युद्धं प्रवृत्तं इति प्रश्नमुत्सृज्य किमकुर्वत इति प्रश्नः अनुपपन्नः इति न शङ्कनीयम्। धर्मक्षेत्रे इत्युक्तत्वात् - शङ्करानन्द) धर्मः यज्ञयुद्धादिः श्रुत्यादिविहितः स्वर्गादिहेतुः तस्य क्षेत्रं विहितस्थलम् धर्मक्षेत्रम्, पुण्यभूमित्वाद् अत्र कृतस्स्वल्पोपि धर्मः बहुफलदो भवति इति द्योनार्थमिदं विशेषणम् (रामरायकवि)। राज्ञे कुरवे तस्य तपःफलभूतम् इन्द्रस्य वरप्रदानम् , तन्निमित्तं कुरुक्षेत्रस्य धर्मक्षेत्रत्वम्। विषदान-लाक्षागृहदहन-कपटराज्यग्रहणादि-अधर्ममार्गेण स्वपुत्रैः बहुशः क्लेशिताः अपि पाण्डवाः धर्मक्षेत्रे गताः, पूर्वमेव धार्मिकाः तत्क्षेत्रमहिम्ना प्रवृद्धधर्माः सन् पक्षद्वयहिंसानिमित्ताद् अधर्माद् भीताः अथवा स्वजनवधः नरकायेति नरकभयाद् भीताः युद्धाद् उपरताः किम्? अथवा  धर्मक्षेत्रमाहात्म्येन दुर्योधनः धर्मपरः भूत्वा पित्र्यं धर्म्यं अर्धराज्यं तेषां दत्तवान्  वा उत सर्वे युद्धमेव कृतवन्तो वा इति मोहात् प्रश्नबीजम्।
- मामकाः.. इति स्वकीयेभ्यः पाण्डवानां पृथङ्निर्देशेन तेषु ममकाराभावोक्तेः दुर्योधनादीनां जयः, पाण्डवानां पराजयः च स्वाभिमतार्थः प्रदर्शितः। तेन धृतराष्ट्रस्य बुद्धेरन्धत्वमपि प्रदर्शितम्।
- एवकाराच्चतुरङ्गसैन्यानि (रामरायकवि)

(आनन्दगिरि) तदेव वचनमुदाहरति - पश्येति।

## श्लोकः २

सञ्जय उवाच - (धृतराष्ट्रं प्रति इति शेषः)

**दृष्ट्वा तु पाण्डवानीकं[2] व्यूढं[3] दुर्योधनस्तदा।**

**आचार्यमुपसङ्गम्य राजा वचनमब्रवीत्।। २ ।।**

तदा राजा दुर्योधनः व्यूढं पाण्डवानीकं दृष्ट्वा तु आचार्यम् उपसङ्गम्य वचनम् अब्रवीत्।

सञ्जयः *sañjayaḥ* — *Sañjaya*; उवाच *uvāca* — said;
तदा तु *tadā tu* — but then; पाण्डव-अनीकम् *pāṇḍava-anīkam* — army of the *Pāṇḍavas*; व्यूढम् *vyūḍham* — in battle formation; दृष्ट्वा *dṛṣṭvā* — seeing; राजा दुर्योधनः *rājā duryodhanaḥ* — the King *Duryodhana*; आचार्यम् *ācāryam* — the teacher (*Droṇa*); उपसङ्गम्य *upasaṅgamya* — approaching; वचनम् *vacanam* — these words; अब्रवीत् *abravīt* — spoke

---

[2]अनीकशब्दः सामान्यसैन्यवाची।
[3]विपुल, पृथुल, संहत, स्फीत, परिहित, विन्यस्त, व्यूहरचनया व्यवस्थितमिति यावत्। व्यूहो नामात्र सैन्यसंस्थानविशेषः धनुर्वेदप्रसिद्धः।

Sañjaya said:

Then, seeing the army of the Pāṇḍavas in battle formation, King Duryodhana approaching his teacher, Droṇa, spoke these words.

आनन्दगिरि

किमस्मदीयं प्रबलं बलं प्रतिलभ्य धीरपुरुषैः भीष्मादिभिः अधिष्ठितं परेषां भयमाविरभूत्, यद्वा पक्षद्वयहिंसानिमित्ताद् धर्मभयमासीद् येन एते युद्धादुपरमेरन् इत्येवं पुत्रपरवशस्य पुत्रस्नेहाभिनिविष्टस्य धृतराष्ट्रस्य प्रश्ने संजयस्य प्रतिवचनम् - दृष्ट्वा इत्यादि। पाण्डवानां भयप्रसङ्गो नास्ति इत्येतत् तुशब्देन द्योत्यते, प्रत्युत दुर्योधनस्य एव राज्ञो भयं प्रभूतं प्रादुर्बभूव। पाण्डवानां पाण्डुसुतानां युधिष्ठिरादीनाम् अनीकं सैन्यं धृष्टद्युम्नादिभिरतिधृष्टैर्व्यूहाधिष्ठितं दृष्ट्वा प्रत्यक्षेण प्रतीत्य त्रस्तहृदयो दुर्योधनो राजा तदा तस्यां संग्रामोद्योगावस्थायाम् आचार्यं द्रोणनामानम् आत्मनः शिक्षितारं रक्षितारं च श्लाघयन् उपसङ्गम्य तदीयं समीपं विनयेन प्राप्य भयोद्विग्नहृदयत्वे अपि तेजस्वित्वादेव वचनमर्थसहितं वाक्यमुक्तवान् इत्यर्थः । २

- अत्र राजेत्यनेनैव कर्तृ-आकाङ्क्षानिवृत्तेः दुर्योधनपदमधिकं सद् दुःखं योधनं अस्य इति व्युत्पत्त्या युद्धनिर्विण्णः (fear) जातः इत्यमुमर्थं प्रतिपादयति - तत्र हेतुः दृष्ट्वा इति।
- आचार्यसमीपं स्वयमेव गत्वा, न तु स्वसमीपमाहूय। एतेन सैन्यदर्शनजनितं भयं सूच्यते। भयेन स्वरक्षार्थं तत्समीपगमने अपि आचार्यगौरवव्याजेन भयसंगोपनं राजनीतिकुशलत्वाद् इत्यर्थः। (मधुसूदन)
- तु-शब्देन दर्शनपूर्वावस्थातः वैलक्षण्यं द्योत्यते । बह्वक्षौणीबलाढ्योहं, मम एव विजयः इति प्रथमं दुराशा स्थिता। सा तु पाण्डवबलदर्शनानन्तरं विगता। अत्रापि पाण्डवानीकमेव दृष्टम्। न तु पाण्डवाः। अनीकमपि व्यूढमेव, स्वस्वस्थाने व्यूह्य स्थितमेव, न तु युद्धाय उत्थितम्। शस्त्रसंपाते पाण्डवदर्शने कीदृशी अवस्था भवेदिति उक्तं भवति। राज्ञः एव ईदृशी दशा चेत् किमुत अन्येषामिति सूचितम्।
- उत्तरे-श्लोकस्थशब्देभ्यः अपि एतत्स्फुटीभविष्यति।
- राजाब्रवीद् इत्येव सिद्धे वचनपदेन संक्षिप्त-बह्वर्थत्वादिगुणवत्वं वाक्यस्य सूच्यते (नीलकण्ठ)। पाकं पचतीतिवद् निर्देशः सर्वकविसंमतत्वाद् न पुनरुक्तिदोषावहः (रामरायकवि)।

## श्लोकः ३

**पश्यैतां पाण्डुपुत्राणाम् आचार्य महतीं चमूम्[4]।**

**व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता।। ३ ।।**

आचार्य तव धीमता शिष्येण द्रुपदपुत्रेण व्यूढां पाण्डुपुत्राणाम् एतां महतीं चमूम् पश्य (or पाण्डुपुत्राणाम् आचार्य) ।

आचार्य *ācārya* — Oh! Teacher; तव शिष्येन *tava śiṣyeṇa* — by your disciple; धीमता *dhīmatā* — by the brilliant; द्रुपद-पुत्रेण *drupada-putreṇa* — by the son of *Drupada*; व्यूढाम् *vyūḍhām*

---

[4]चमूशब्दः सैन्यसंख्याविशेषः धनुर्वेदप्रसिद्धः । स च एवम् - गजारोहिणः ७२९, रथारोहिणः १४५८, अश्वारोहिणः २१८७, पदातयः २९१६ इति। साकल्येन ७२९० इत्येतत्संख्याकाः सेनाः।

— formed (and led); पाण्डु-पुत्राणाम् *pāṇḍu-putrāṇām* — of the sons of *Pāṇḍu*; एताम् *etām* — this; महतीम् *mahatīm* — great; चमूम् *camūm* —army; पश्य *paśya* — please look at

Oh Teacher! Please look at this great army of the sons of Pāṇḍu, formed and led by your brilliant disciple, the son of Drupada. (3)

आनन्दगिरि

एतामस्मदभ्याशे (vicinity) महापुरुषानपि भवत्प्रमुखान् अपरिगणय्य भयलेशशून्याम् अवस्थितां चमूमिमां सेनां पाण्डुपुत्रैः युधिष्ठिरादिभिः आनीतां महतीम् अनेकाक्षौहिणी सहिताम् अक्षोभ्यां पश्य इत्याचार्यं दुर्योधनः नियु□ नियोगद्वारा च तस्मिन् (द्रोणाचार्ये) परेषामवज्ञां विज्ञापयन् क्रोधातिरेकम् उत्पादयितुमुत्सहते (चेष्टते, उद्यमं करोति इत्यर्थः) । परकीयसेनायाः वैशिष्ट्याभिधानद्वारापरपक्षेऽपि त्वदीयमेव बलमिति सूचयन् आचार्यस्य तन्निरसनं सुकरमिति मन्वानः सन्नाह - व्यूढामिति। राज्ञो द्रुपदस्य पुत्रस्तव शिष्यो धृष्टद्युम्नो लोके ख्यातिमुपगतः स्वयं च शस्त्रास्त्रविद्यासंपन्नः महामहिमा तेन व्यूहमापद्य अधिष्ठिताम् इमां चमूं किमिति न प्रतिपद्यसे किमिति वा मृष्यसीत्यर्थः।

- पाण्डुपुत्राणां महतीं चमूं पश्य - इत्यनेन स्वस्य भयकारणं, तन्निमित्तमागमनं च दर्शितम्।
- हे पाण्डुपुत्राणाम् आचार्य, न तु मम । तेषां स्नेहातिशयात्।
- ननु बह्वक्षौहिणीपतेः तवैव महती सेना, न तु इयम्, तत्कुतः बिभेषि - तत्राह एतामिति। न संख्याकृतमिह सेनामहत्त्वम्। शतमपि अन्धानां न पश्यति इति न्यायात्। किन्तु विशिष्टसेनान्यधिष्ठितत्वात्। तच्च अत्र प्रत्यक्षमेव इत्यङ्गुल्या निर्देश- सूचकः अयमेतत्-शब्दः।
- व्यूढां तु धृष्टद्युम्नेन इत्यनुक्त्वा द्रुपदपुत्रेण इति कथनं द्रुपद-पूर्व-वैर-सूचनेन क्रोधोद्दीपनार्थम्। त्वद्-वधार्थं द्रुपदेन उत्पादितः अयं धृष्टद्युम्नः, पुरतः सेनामधिष्ठाय तिष्ठति, क्षणमपि त्वया नोपेक्षणीयः किन्तु हन्तव्यः एव इत्ययमर्थः दर्शितः।
- द्रुपदपुत्रेण तव शिष्येण इति त्वद्वधार्थम् उत्पन्नोऽपि त्वया अध्यापितः इति तव मौढ्यमेव मम अनर्थकारणमिति सूचित्वा जयं प्रार्थयति।
- तवशिष्येण इति कथनं स्वशिष्यरचितः व्यूहः भवता गुरुणा भेत्तुं सुशकः इति सूचयितुम्।

  शत्रोः तव सकाशात् त्वद्वधोपायभूता गृहीता इति तस्य (धृष्टद्युम्नस्य) धीमत्त्वम्।महतीमिति वक्ष्यमाणमहारथबाहुल्येन।

## श्लोकः ४-६

अन्येऽपि प्रतिपक्षे पराक्रमभाजो बहवः सन्तीत्यनुपेक्षणीयत्वं परपक्षस्य विवक्षयन् आह - अत्रेति।

**अत्र शूरा महेष्वासाः भीमार्जुनसमा युधि।**

**युयुधानो विराटश्च द्रुपदश्च महारथः।। ४ ।।**

**धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान् ।**

**पुरुजित् कुन्तिभोजश्च शैब्यश्च नरपुङ्गवः।। ५ ।।**

**युधामन्युश्च विक्रान्तः उत्तमौजाश्च वीर्यवान्।**

**सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः।। ६ ।।**

अत्र युधि भीमार्जुनसमाः महेष्वासाः शूराः (सन्ति)। (ते) युयुधानः विराटः च महारथः द्रुपदः च धृष्टकेतुः चेकितानः वीर्यवान् काशिराजः च पुरुजित् कुन्तिभोजः च नरपुङ्गवः शैब्यः च विक्रान्तः युधामन्युः च वीर्यवान् उत्तमौजाः च सौभद्रः द्रौपदेयाः च। (ते) सर्वे एव महारथाः (सन्ति)

अत्र *atra* — herein the army of *Pāṇḍavas*); युधि *yudhi* — in battle; भीमार्जुनसमाः *bhīma-arjuna-samāḥ* — equal to *Bhīma* and *Arjuna*; शूराः *śūrāḥ* — unrivalled experts; महेष्वासाः *maheṣvāsāḥ* — men of great bows; (सन्ति *santi* — there are;) युयुधानः *yuyudhānaḥ* — *Yuyudhāna (Sātyaki)*; च *ca* — and; विराटः *virāṭaḥ* — the king of *Virāṭa*; च *ca* — and; द्रुपदः *drupadaḥ* — King *Drupada* (father of *Draupadī*); महारथः *mahārathaḥ* — the man of great valour; धृष्टकेतुः *dhṛṣṭaketuḥ* — *Dhṛṣṭaketu*; चेकितानः *cekitānaḥ* — *Cekitāna*; च *ca* — and; वीर्यवान् *vīryavān* — the valiant; काशिराजः *kāśirājaḥ* — the king of *Kāśī*; पुरुजित् *purujit* — *Purujit*; कुन्तिभोजः *kuntibhojaḥ* — *Kuntibhoja*; शैब्यः *śaibyaḥ* — *Śaibya;* च *ca* — and; नरपुङ्गवः *narapuṅgavaḥ* — the one who is the most exalted among men; च *ca*— and; विक्रान्तः *vikrāntaḥ* — the one who is very powerful; युधामन्युः *yudhāmanyuḥ* — *Yudhāmanyu*; च *ca* — and; वीर्यवान् *vīryavā*n — one who is of great strength; उत्तमौजाः *uttamaujāḥ* — *Uttamaujas*; च *ca* — and; सौभद्रः *saubhadraḥ* — son of *Subhadrā* (*Abhimanyu*); द्रौपदेयाः *draupadeyaḥ*— the sons of *Draupadī*; च *ca* — and; सर्वे *sarve* — all (these); एव *eva* — indeed; महारथाः *mahārathāḥ* — men of great valour

Here are unrivalled experts, equal to Bhīma and Arjuna in battle, men of great bows — Sātyaki, the king of Virāṭa, and King Drupada, a man of great valour; Dhṛṣṭaketu, Cekitāna, the valiant king of Kāśī, Purujit, Kuntibhoja and Śaibya, the most exalted among men; the powerful Yudhāmanyu, Uttamaujas, a man of great strength, the son of Subhadrā, (Abhimanyu) and the sons of Draupadī — all men of great valour.

आनन्दगिरि

अस्यां हि प्रतिपक्षभूतायां सेनायां शूराः स्वयमभीरवः शस्त्रास्त्रकुशलाः भीमार्जुनाभ्यां सर्वसंप्रतिपन्नवीर्याभ्यां तुल्याः युद्धभूमौ उपलभ्यन्ते। तेषां युद्धशौण्डीरं (युद्धे तेजस्विनम्, गर्वितम्) विशदीकर्तुं - महेष्वासाः इति। इषुरस्यते अस्मिन्निति व्युत्पत्त्या धनुस्तदुच्यते। तच्च महद् अन्यैः अप्रधृष्यं तद्येषां ते राजानः तथा विवक्ष्यन्ते। तानेव परसेनामध्यम् अध्यासीनान् परपक्षानुरागिणः राज्ञः विज्ञापयति - युयुधान इत्यादिना सौभद्रो द्रौपदेयाश्च इत्यन्तेन। ४ । स्पष्टम् ५।

तेषां सर्वेषामपि महाबलपराक्रमभाक्त्वात् अनुपेक्ष्यत्वं पुनर्विवक्षति - सर्वे एव इति। ६।

एकः दशसहस्राणि योधयेत् यस्तु धन्विनाम्।

शस्त्रशास्त्रप्रवीणश्च महारथ इति स्मृतः।। (महाभारत - उद्योगपर्व १६९ - १७२)

आत्मानं सारथिं चाश्वान् रक्षन्नक्षतमायुधैः।

यो युध्यत्ययुतैर्वीरैः स महारथ उच्यते।। (अक्षत - without being wounded)

एको दशसहस्राणि योधयेद्यस्तु धन्विनाम्।
शस्त्रशास्त्रप्रवीणश्च महारथ इति स्मृतः।।

अमितान् योधयेद्यस्तु सम्प्रोक्तोऽतिरथस्तु सः।
रथस्त्वेकेन यो योद्धा तन्न्यूनोऽर्धरथः स्मृतः।।

- ननु एकेन द्रुपदपुत्रेण अप्रसिद्धेन अधिष्ठितां चमूम् एताम् अस्मदीयः यः कश्चिदपि जेष्यति किमिति त्वमित्ताम्यसि इत्यताह - अत्र शूरा इतयादिभिस्त्रिभिः। (मधुसूदन) । तेषामुपेक्षणीयत्वं सर्वप्रकारैः वारयति शूराः इत्यादिविशेषणैः।
- महेष्वासाः - दूरत एव परसैन्यविद्रावणकुशलाः इति भावः। महाधनुरादिमत्त्वेऽपि युद्धकौशलाभावम् आश€च आह - भीमार्जुनसमा युधि इति। सर्वसंप्रतिपन्नपराक्रमाभ्यां समाः तुल्याः।
- सर्वाणि विशेषणानि समुच्चित्य सर्वत्र योजनीयानि।
- एते सप्तदशराजानः सर्वे महारथाः, एतेषां मध्ये कश्चिदपि रथः (single-handedly face 1000 soldiers), अर्धरथः (face less than 1000) वा अस्तीत्यर्थः। (अतिरथः is one who can fight countless people single-handedly. शल्य is an example.)

## श्लोकः ७

यद्येवं परकीयं बलं अतिप्रभूतं प्रतीत्य अतिभीतवद् अभिदधासि हन्त संधिरेव परैः इष्यताम् अलं विग्रह-आग्रहेण इत्याचार्य-अभिप्रायम् आशङ्क्य ब्रवीति - अस्माकमिति।

**अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम।**

**नायका मम सैन्यस्य संज्ञार्थं तान् ब्रवीमि ते।। ७ ।।**

द्विजोत्तम तु मम सैन्यस्य अस्माकं ये विशिष्टाः नायकाः (सन्ति) तान् निबोध। तान् संज्ञार्थं ते ब्रवीमि।

द्विज-उत्तम *dvija-uttama* — Oh! Learned among the twice-born (*brāhmaṇas*); अस्माकम् *asmākam* — of us; तु *tu* — whereas; ये *ye* — those who; विशिष्टाः *viśiṣṭāḥ* — are important; मम सैन्यस्य *mama sainyasya* — of my army; नायकाः *nāyakāḥ* — leaders; तान् *tān* — them; निबोध *nibodha* — please take note; ते *te* — to you; संज्ञार्थम् *saṃjñārtham* — in order to introduce; तान् *tān* — them; ब्रवीमि *bravīmi* — I mention

Whereas, Oh Learned! Among the twice-born (*brāhmaṇa*s), please take note of those who are important amongst ourselves, the leaders of my army. I mention them in order to introduce them to you. ( 7)

आनन्दगिरि

तुशब्देन अन्तरुत्पन्नमपि स्वकीयं भयं तिरोदधानो धृष्टताम् आत्मनो द्योतयति । ये खलु अस्मत्पक्षे व्यवस्थिताः सर्वेभ्यः समुत्कर्षजुषः (समुत्कर्षसेविनः) तान् मया उच्यमानान् निबोधत निश्चयेन मद्वचनाद् अवधारय इत्यर्थः। यद्यपि त्वमेव त्रैवर्णिकेषु त्रैविद्यवृद्धेषु प्रधानत्वात् प्रतिपत्तुं प्रभवसि तथापि मदीयसैन्यस्य ये मुख्याः तानहं ते तुभ्यं संज्ञार्थम् असंख्येषु तेषु मध्ये कतिचिद् नामभिः गृहीत्वा परिशिष्टान् उपलक्षयितुं विज्ञापनं करोमि, न तु अज्ञातं किञ्चित् तव ज्ञापयामि इति मत्वा आह - द्विजोत्तम इति।

- द्विजोत्तमेति विशेषणेन आचार्यं स्तुवन् स्वकार्ये तदाभिमुख्यं संपादयति। दौष्ट्यपक्षे द्विजोत्तमेति ब्राह्मणत्वात् तावद् युद्ध-अकुशलः त्वम्, तेन त्वयि विमुखेऽपि भीष्मप्रवराणां सत्त्वाद् न अस्माकं महती क्षतिः इत्यर्थः।

- संज्ञार्थमिति प्रियशिष्याणां पाण्डवानां चमूं दृष्ट्वा हर्षेण व्याकुलमनसः तव स्वीयवीरविस्मृतिः मा भूदिति मम इयमुक्तिरिति भावः।
- अस्माकं तु इति निर्धारणषष्ठ्या अस्माकं मध्ये तु इत्यर्थः (वंशी)

श्लोकः ८

**भवान् भीष्मश्च कर्णश्च कृपश्च समितिंजयः।**

**अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ।। ८ ।।**

भवान् भीष्मः च कर्णः च कृपः च समितिंजयः अश्वत्थामा विकर्णः च सौमदत्तिः तथा एव च

भवान् *bhavān* — Your Honour; भीष्मः *bhīṣmaḥ* — *Bhīṣma*; च *ca* — and; कर्णः *karṇaḥ* — *Karṇa*; च *ca* — and; कृपः *kṛpaḥ* — *Kṛpa;* च *ca* — and; समितिञ्जयः *samitiñjayaḥ* — one who is always victorious; अश्वत्थामा *aśvatthāmā* — *Aśvatthāmā*; विकर्णः *vikarṇaḥ* — *Vikarṇa*; च *ca* — and; सौमदत्तिः *saumadattiḥ* — *Saumadatti*, son of *Somadatta (Bhūriśravā)*; जयद्रथः *jayadrathaḥ* — *Jayadratha;*

Your Honour, Bhīṣma, Karṇa, and Kṛpa, who is always victorious in war, Aśvatthāmā, Vikarṇa, Saumadatti — son of Somadatta, (Bhūriśravā) and Jayadratha; (8)

आनन्दगिरि

तानेव स्वसेनाविशिष्टान् पुरुषधौरेयान् आत्मीयभयपरिहारार्थं परिगणयति - भवानित्यादिना। ८

- समितिंजय इति कृपविशेषणं, कर्णादनन्तरं गण्यमानत्वेन तस्य कोपमाशङ्क्य तन्निरासार्थम्।
- विशिष्टान् गणयति - भवानिति। नायकान् गणयति - अश्वत्थामा इति।
- भीष्मापेक्षया आचार्यस्य प्रथमगणनवद् विकर्णाद्यपेक्षया तत्पुत्रस्य प्रथमगणनम् आचार्यपरितोषार्थम्।

श्लोकः ९

आनन्दगिरिद्रोणादिपरिगणनस्य परिशिष्ट-परिसंख्यार्थत्वं (तादृश-अन्य-प्रतिषेधविषयत्वम्) व्यावर्त्तयति - अन्ये च इति।

**अन्ये च बहवश्शूरा मदर्थे त्यक्तजीविताः।**

**नानाशस्त्रप्रहरणास्सर्वे युद्धविशारदाः।। ९ ।।**

अन्ये बहवः शूराः मदर्थे त्यक्तजीविताः नानाशस्त्रप्रहरणाः च (सन्ति) । सर्वे युद्धविशारदाः (सन्ति)।

अन्ये च *anye ca* — and other; बहवः *bahavaḥ* — many; शूराः *śūrāḥ* — warriors; मदर्थे *madarthe* — for my sake; त्यक्त-जीविताः *tyakta-jīvitāḥ* — who have given up their lives; नाना-शस्त्रप्रहरणाः *nānā-śastra-praharaṇāḥ* — having many kinds of weapons; सर्वे *sarve* — all; युद्ध-विशारदाः *yuddha-viśāradāḥ* — experts in warfare

And many other warriors, all experts in warfare, armed with many kinds of weapons, who are determined to give up their lives for my sake (are present on our side). (9)

आनन्दगिरि

सर्वेऽपि भवन्तमारभ्य मदीयपृतनायां प्रविष्टाः स्वजीवितादपि मह्यं स्पृहयन्ति इत्याह - मदर्थ इति। यत्तु तेषां शूरत्वमुक्तं तदिदानीं विशदयति - नानेति। नानाविधान्यनेकप्रकाराणि शस्त्राण्यायुधानि प्रहरणानि प्रहरणसाधनानि येषां ते तथा। बहुविधायुधसंपत्तौ अपि ततप्रयोगे नैपुण्याभावे तद्वैफल्यमिति चेत् न इत्याह - सर्वे इति। ९

अन्ये शल्यकृतवर्मप्रबृतयः।

- मदर्थे मत्प्रयोजनाय जीवितमपि त्यक्तुम् अध्यवसिताः इत्यर्थेन त्यक्तजीविता इत्यनेन स्वस्मिन् अनुरागातिशयः तेषां कथ्यते। अचिरेणैव ते जीवितं त्यक्ष्यन्ति इत्यपि सूचितं भवति। (वंशी)। अनेन च दैवाद् अपजयः दुर्योधनस्य सूचितः भवति (रामरायकवि)

## श्लोकः १०

आनन्दगिरि

राजा पुनरपि स्वकीय-भयाभावे हेत्वन्तरम् आचार्यं प्रत्यावोदयति - अपर्याप्तमिति।

**अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम्।**

**पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम्।। १० ।।**

तद् भीष्माभिरक्षितम् अस्माकं बलं अपर्याप्तं । तु इदम् भीमाभिरक्षितम् एतेषां बलं पर्याप्तं

भीष्म-अभिरक्षितम् *bhīṣma-abhirakṣitam* — well-protected by *Bhīṣma*; अस्माकम् *asmākam* — our; तत् *tat* — that; बलम् *balam* — army; अपर्याप्तम् *aparyāptam* — cannot be overwhelmed; तु *tu* — whereas; भीम-अभिरक्षितम् *bhīma-abhirakṣitam* — even though protected by *Bhīma;* एतेषाम् *eteṣām* — of these people in front of us; इदम् *idam* — this, बलम् *balam* — army; पर्याप्तम् *paryāptam* — can be overwhelmed

Our army (being larger), well-protected by Bhishma, cannot be overwhelmed, whereas the army of these people in front of us, even though protected by Bhima, can be overwhelmed.

आनन्दगिरि

अस्माकं खलु इदम् एकादशसंख्याक-अक्षौहिणी परिगणितम् अपरिमितं बलं भीष्मेण च प्रथितमहामहिम्ना सूक्ष्मबुद्धिना सर्वतो रक्षितं, पर्याप्तं परेषां परिभवे समर्थम्। एतोषां पुनः तदल्पं सप्तसंख्याक-अक्षौहिणी-परिमितं बलं भीमेन च चपलबुद्धिना कुशलताविकलेन परिपालितम् अपर्याप्तम्, अस्मान् अभिभवितुमसमर्थः इत्यर्थः। अथवा तदिदमस्माकं बलं भीष्माधिष्ठितं अपर्याप्तम् अपरिमितम् अधृष्यम् (अनभिभवनीयम्) अक्षोभ्यम्, एतेषां तु पाण्डवानां बलं भीमसेनाभिरक्षितं पर्याप्तं परिमितम्। सोढुं शक्यम् इत्यर्थः। अथवा तत्पाण्डवानां बलम् अपर्याप्तं न अलमस्माकम् अस्मभ्यं भीष्माभिरक्षितं भीष्मः अभिरक्षितः अस्मै परबलनिवृत्त्यर्थमिति तदेव तथा उच्यते। इदं पुनः अस्मदीयं बलमेतेषां पर्याप्तं परिभवे समर्थं, भीमाभिरक्षितं भीमः दुर्बलहृदयः यस्माद् अस्मै परबलनिवृत्त्यर्थम् अभिरक्षितः तस्माद् अस्माकं न किञ्चिदपि भयकारणमस्ति इत्यर्थः। १०

रामरायकवि

भीष्माभिरक्षितम् अस्माकं बलं अपर्याप्तं परबलविजय-अक्षमम् इत्यर्थः। भीष्मस्य वृद्धत्वाद् इति भावः। भीष्मस्य धर्मिष्ठत्वेन पाण्डवपक्षपातित्वाद् इत वा भावः। भीमाभिरक्षितम् एतेषां बलं तु पर्याप्तं भीमस्य भीमस्य तरुणत्वात् सर्वधार्तराष्ट्रवधदीक्षितत्वात् आबाल्यात् ससोदरस्य दुर्योधनस्य भीमेन बहुशो निर्जितत्वात् च भयहेतुः भीमः दुर्योधनस्य इति भावः।

## श्लोकः ११

आनन्दगिरि

स्वकीयबलस्य भीष्माधिष्ठितत्वेन बलिष्ठत्वम् उक्त्वा भीष्मशेषत्वेन तदनुगुणत्वं द्रोणादीनां प्रार्थयते - अयनेष्विति।

**अयनेषु च सर्वेषु यथाभागमवस्थिताः ।**

**भीष्ममेवाभिरक्षन्तु भवन्तस्सर्व एव हि।। ११ ।।**

सर्वेषु अयनेषु यथाभागम् अवस्थिताः च भवन्तः सर्वे एव भीष्मम् एव अभिरक्षन्तु हि। (११)

सर्वेषु अयनेषु च *sarveṣu ayaneṣu ca* — in all divisions (of the army); यथाभागम् *yathābhāgam* — in (your) respective positions; अवस्थिताः *avasthitāḥ* — stationed; भवन्तः सर्वे एव हि *bhavantaḥ sarve eva hi* — all of you indeed; भीष्मम् एव *bhīṣmam eva* — *Bhīṣma alone*; अभिरक्षन्तु *abhirakṣantu* — may protect

Stationed in your respective positions, in all the divisions of the army, all of you should indeed protect Bhishma in particular.

आनन्दगिरि

कर्त्तव्यविशेषद्योती च-शब्दः। समर-समारम्भसमये योधानां यथाप्रधानं युद्धभूमौ पूर्वापरादि-दिग्विभागेन अवस्थितिस्थानानि नियम्यन्ते तानि अत्र अयनानि उच्यन्ते। सेनापतिश्च सर्वसैन्यमधिष्ठाय मध्ये तिष्ठति। तेषु सर्वेषु प्रक्लृप्तं प्रविभागं अप्रत्याख्याय भवान् अश्वत्थामा कर्णश्च इत्येवमादयो भवन्तः सर्वे अवस्थिताः सन्तः भीष्ममेव सेनापतिं सर्वतो रक्षन्तु, तस्य हि रक्षणे सर्वम् अस्मदीयं बलं रक्षितं स्यात्, परबलनिवृत्यर्थत्वेन तस्य अस्माभी रक्षितत्वाद् इत्यर्थः। ११

श्लोकः १२

**तस्य संजनयन् हर्षं कुरुवृद्धः पितामहः।**

**सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान्।। १२ ।।**

कुरुवृद्धः पितामहः प्रतापवान् तस्य हर्षं संजनयन् सिंहनादं उच्चैः विनद्य शङ्खं दध्मौ । (१२)

प्रतापवान् *pratāpavān* — one who is known for his valour; कुरुवृद्धः पितामहः *kuruvṛddhaḥ pitāmahaḥ* — the grandfather of the *Kuru* family; तस्य *tasya* — his; हर्षम् *harṣam* — happiness; सञ्जनयन् *sañjanayan* —intending to produce; उच्चैः *uccaiḥ* — loudly; सिंहनादम् *siṃhanādam* — a roar like a lion; विनद्य *vinadya* — making; शङ्खम् *śaṅkham* — conch; दध्मौ *dadhmau* — he blew

Bhishma, the grandfather of the Kuru family, known for his valour, loudly let out a lion's roar and blew his conch in order to make Duryodhana happy.

श्लोकः १३

**ततश्शङ्खाश्च भेर्यश्च पणवानकगोमुखाः ।**

**सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ।। १३ ।।**

ततः शङ्खाः भेर्यः च पणवानकगोमुखाः च सहसा एव अभ्यहन्यन्त । सः शब्दः तुमुलः अभवत्

ततः *tataḥ* — then; शङ्खाः *śaṅkhāḥ* — conches; च *ca* — and; भेर्यः *bheryaḥ* — kettle drums; च *ca* — and; पणव-आनक-गोमुखाः *paṇava-ānāka-gomukhāḥ* — tabors, trumpets, and cowhorns; सहसा एव *sahasā eva* — quite suddenly; अभ्यहन्यन्त *abhyahanyanta* —were blasted forth; सः *saḥ* — that; शब्दः *śabdaḥ* — sound; तुमुलः अभवत् *tumulaḥ abhavat* — was earth-shaking

Then, suddenly, conches, kettledrums, tabors, trumpets, and cow-horns were blasted forth and the sound was earth-shaking indeed.

श्लोक: १४

**ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ ।**

**माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ।। १४ ।।**

ततः श्वेतैः हयैः युक्ते महति स्यन्दने स्थितौ माधवः पाण्डवः च एव दिव्यौ शङ्खौ प्रदध्मतुः

ततः *tataḥ* — then; श्वेतैः हयैः *śvetaiḥ hayaiḥ* — by white horses; युक्ते *yukte* — yoked (drawn); महति स्यन्दने *mahati syandane* — in the great chariot; स्थितौ *sthitau* — seated; माधवः *mādhavaḥ* — *Kṛṣṇa*; पाण्डवः *pāṇḍavaḥ* — *Arjuna*; च *ca* and; एव *eva* — also; दिव्यौ *divyau* — celestial; शङ्खौ *śaṅkhau* — conches; प्रदध्मतुः *pradadhmatuḥ* — sounded

Then, Krishna and Arjuna, seated in the great chariot drawn by white horses, also sounded their divine conches.

श्लोक: १५

**पाञ्चजन्यं हृषीकेशः देवदत्तं धनञ्जयः ।**

**पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः ।। १५ ।।**

हृषीकेशः पाञ्चजन्यं (दध्मौ) धनञ्जयः देवदत्तं (दध्मौ) भीमकर्मा वृकोदरः महाशङ्खं पौण्ड्रं दध्मौ ।

हृषीकेशः *hṛṣīkeśaḥ* — Lord of all the senses, *Kṛṣṇa*; पाञ्चजन्यम् *pāñcajanyam* — *Pāñcajanya*; धनञ्जयः *dhanañjayaḥ* — *Arjuna*; देवदत्तम् *devadattam* — *Devadatta*; भीमकर्मा *bhīmakarmā* — the one of terrible deeds (*Bhīma)*; वृकोदरः *vṛkodaraḥ* — *Vṛkodara* (*Bhīma),* one who has the stomach of a wolf; महाशङ्खम् *mahāśaṅkham* — a huge conch; पौण्ड्रम् *pauṇḍram* — *Pauṇḍra*; दध्मौ *dadhmau* — sounded

Krishna sounded the Pancajanya, Arjuna the Devadatta, and Bhima, the man of terrible deeds and one with the stomach of a wolf, sounded his huge conch, Paundra.

श्लोकः १६

**अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः।**

**नकुलः सहदेवश्च सुघोषमणिपुष्पकौ।। १६।।**

कुन्तीपुत्रः राजा युधिष्ठिरः अनन्तविजयं (दध्मौ) नकुलः सहदेवः च सुघोषमणिपुष्पकौ (दध्मतुः)।।

कुन्तीपुत्रः *kuntīputraḥ* — son of *Kuntī*; राजा युधिष्ठिरः *rājā yudhiṣṭhiraẏaḥ* — King *Yudhiṣṭhira*; अनन्तविजयम् *anantavijayam* — the name of *Yudhiṣṭhira's* conch; नकुलः सहदेवः च *nakulaḥ sahadevaḥ ca* — *Nakula* and *Sahadeva*; — सुघोष-मणिपुष्पकौ *sughoṣa-maṇipuṣpakau* — *Sughoṣa* and *Maṇipuṣpaka* (the names of *Nakula's* and *Sahadeva's* conches)

King Yudhiṣṭhira, the son of Kuntī, blew Anantavijaya and Nakula and Sahadeva blew Sughoṣa and Maṇipuṣpaka respectively. (16)

श्लोकः १७-१८

**काश्यश्च परमेष्वासः शिखण्डी च महारथः।**

**धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः।। १७।।**

**द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते।**

**सौभद्रश्च महाबाहुः शङ्खान् दध्मुः पृथक् पृथक्।। १८।।**

पृथिवीपते परमेष्वासः काश्यः च शिखण्डी च महारथः धृष्टद्युम्नः विराटः च अपराजितःसात्यकिः च द्रुपदः द्रौपदेयाः च महाबाहुः सौभद्रः च सर्वशः पृथक् पृथक् शङ्खान् दध्मुः ।।

पृथिवीपते *pṛthivīpate* — Oh! King; काश्यः च परम-इष्वासः *kaśyaḥ ca parama-iṣvāsaḥ* — the king of *Kāśī,* an expert bowman; महारथः शिखण्डी *mahārathaḥ śikhaṇḍī* — *Śikhaṇḍī,* the man of great valour; च *ca* — and; धृष्टद्युम्नः *dhṛṣṭadyumnaḥ* — *Dhṛṣṭadyumna;* विराटः

*virāṭaḥ* — *Virāṭa*; च *ca* — and; अपराजित: *aparājitaḥ* — unsurpassed; सात्यकि: *sātyakiḥ* *Sātyaki*; च *ca* — and; द्रुपद: *drupadaḥ* — *Drupada;* द्रौपदेया: च *draupadeyāḥ ca* — and the sons of *Draupadī;* महाबाहु: सौभद्र: च *mahābāhuḥ saubhadraḥ ca* — and the mighty-armed son of *Subhadrā (Abhimanyu);* सर्वश: *sarvaśaḥ* — on all sides; पृथक् पृथक् *pṛthak pṛthak* — separately; शङ्खान् दध्मु: *śaṅkhān dadhmuḥ* — blew their conches

Oh King! The king of Kāśī, an expert bowman, Śikaṇḍī, the man of great valour, Dhṛṣṭadyumna, and Virāṭa, and the unsurpassed Sātyaki; Drupada, the sons of Draupadī and the mighty-armed son of Subhadrā (Abhimanyu), all blew their own conches. (17-18)

श्लोक: १९

**स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत्।**

**नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन्।। १९।।**

स: घोष: तुमुल: (सन्) नभ: च पृथिवीं च व्यनुनादयन् धार्तराष्ट्राणां हृदयानि व्यदारयत् एव।

स: *saḥ* — that; तुमुल: *tumulaḥ* — tremendous; घोष: *ghoṣaḥ* — sound; नभ: *nabhaḥ* — sky; च *ca* — and; पृथिवीम् *pṛthivīm* — earth; च *ca* — and; एव *eva* — indeed; व्यनुनादयन् *vyanunādayan* — reverberating; धार्तराष्ट्राणाम् *dhārtarāṣṭrāṇām* — of the sons of *Dhṛtarāṣṭra*; हृदयानि *hṛdayāni* — the hearts; व्यदारयत् *vyadārayat* — pierced

श्लोक: २०, २०.५

**अथ व्यवस्थितान् दृष्ट्वा धार्तराष्ट्रान् कपिध्वज:।**

**प्रवृत्ते शस्त्रसम्पाते धनुरुद्यम्य पाण्डव:।। २०।।**

**हृषीकेशं तदा वाक्यं इदमाह महीपते।**

महीपते अथ व्यवस्थितान् धार्तराष्ट्रान् दृष्ट्वा कपिध्वजः पाण्डवः शस्त्रसम्पाते प्रवृत्ते धनुरुद्यम्य तदा हृषीकेशं इदम् वाक्यं आह ।

महीपते *mahīpate* — Oh! King; अथ *atha* — then; व्यवस्थितान् *vyavasthitān* — standing assembled; धार्तराष्ट्रान् *dhārtarāṣṭrān* — the sons of *Dhṛtarāṣṭra*; दृष्ट्वा *dṛṣṭvā* — seeing; कपिध्वजः पाण्डवः *kapidhvajaḥ pāṇḍavaḥ* — *Arjuna*, one who has *Hanumān*, on his banner; शस्त्र-सम्पाते प्रवृत्ते *śastra-sampāte pravṛtte* — when the shooting about to begin; धनुः *dhanuḥ* — bow; उद्यम्य *udyamya* — having lifted; तदा *tadā* — then; हृषीकेशम् *hṛṣīkeśam* — to Lord *Kṛṣṇa*; इदम् *idam* — these; वाक्यम् *vākyam* — words; उवाच *uvāca* — said

Then, Oh King! Seeing the sons of Dhṛtarāṣṭra standing assembled and the battle about to begin, Arjuna, on whose banner was Hanumān, lifting his bow, said these words to Kṛṣṇa. ( 20)

श्लोकः २१-२३

**अर्जुन उवाच**

**सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत।। २१।।**

**यावदेतान्निरीक्षेहं योद्धुकामान् अवस्थितान्।**

**कैर्मया सह योद्धव्यम् अस्मिन् रणसमुद्यमे।। २२।।**

**योत्स्यमानानवेक्षेहं य एतेत्र समागताः।**

**धार्तराष्ट्रस्य दुर्बुद्धेः युद्धे प्रियचिकीर्षवः।। २३।।**

अच्युत मे रथं सेनयोः उभयोः मध्ये यावत् अहम् योद्धुकामान् अवस्थितान् एतान् "अस्मिन् रणसमुद्यमे कैः सह मया योद्धव्यम् (इति पर्यालोचनार्थम्)" निरीक्षे (तावत्) स्थापय । ये एते दुर्बुद्धेः धार्तराष्ट्रस्य युद्धे प्रियचिकीर्षवः अत्र समागताः (तान्) योत्स्यमानान् अहम् अवेक्षे । (२१,२२,२३)

अर्जुनः *arjunaḥ* — *Arjuna*; उवाच *uvāca* — said;
अच्युत *acyuta* — Oh! *Kṛṣṇa*; सेनयोः उभयोः मध्ये *senayoḥ ubhayoḥ madhye* — in the middle of the two armies; मे *me* — my; रथम् *ratham* — chariot; स्थापय *sthāpaya* — (you) place;

यावत् *yāvat* — so that; अहम् *aham* — I; योद्धुकामान् अवस्थितान् *yoddhukāmān avasthitān* — standing (there) desirous to fight; एतान् *etān* — those people; निरीक्षे *nirīkṣe* — can examine; अस्मिन् रणसमुद्यमे *asmin raṇa-samudyame* — at the onset of this battle; कैः सह *kaiḥ saha* — with whom; मया योद्धव्यम् *mayā yoddhavyam* — I should fight

दुर्बुद्धेः *dur-buddheḥ* — of the one whose thinking is distorted; धार्तराष्ट्रस्य *dhārtarāṣṭrasya* — of the son of *Dhṛtarāṣṭra*; युद्धे *yuddhe* — in the battle; प्रिय-चिकीर्षवः *priya-cikīrṣavaḥ* — those who want to please; ये एते *ye ete* —those who; समागताः *samāgatāḥ* — have gathered; अत्र *atra* — here; योत्स्यमानान् *yotsyamānān* — with the intention of fighting; अहम् *aham* — I; अवेक्षे *avekṣe* — want to see

Arjuna said:

Place my chariot, Oh Kṛṣṇa! between the two armies so that, I can examine those people who stand here desirous of fighting, (and also examine) with whom I should fight at the onset of this war.

I want to see those who have gathered here with the intention of fighting, wanting to please the son of Dhṛtarāṣṭra, the one whose thinking is distorted.

श्लोकः १४-२५

**सञ्जय उवाच**

**एवमुक्तो हृषीकेशो गुडाकेशेन भारत।**

**सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम्।। २४।।**

**भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम्।**

**उवाच पार्थ पश्यैतान् समवेतान् कुरूनिति।। २५।।**

भारत गुडाकेशेन एवमुक्तो हृषीकेशः उभयोः सेनयोः मध्ये भीष्मद्रोणप्रमुखतः सर्वेषां महीक्षिताम् च (प्रमुखतः) रथोत्तमम् स्थापयित्वा, पार्थ एतान् समवेतान् कुरून् पश्य इति उवाच । (२४,२५)

सञ्जयः *sañjayaḥ* — *Sañjaya*; उवाच *uvāca* — said;

भारत *bhārata* — Oh! King of the *Bharata* lineage, *Dhṛtarāṣṭra*; गुडाकेशेन *guḍākeśena* — by *Arjuna*; एवम् उक्तः *evam uktaḥ* — thus ordered; हृषीकेशः *hṛṣīkeśaḥ* — Lord *Kṛṣṇa*; सेनयोः उभयोः मध्ये *senayoḥ ubhayoḥ madhye* — in the middle of the two armies; भीष्म-द्रोण-प्रमुखतः *bhīṣma-droṇa-pramukhataḥ* — right in front of *Bhīṣma* and *Droṇa*; च *ca* — and; सर्वेषाम् *sarveṣām* — of all; महीक्षिताम् *mahīkṣitām* — (of the) rulers; रथ-उत्तमम् *ratha-uttamam* — the best of chariots; स्थापयित्वा *sthāpayitvā* — having placed; पार्थ *pārtha* — Oh! *Arjuna*; समवेतान् *samavetān* — who have gathered here; एतान् *etān* — these; कुरून् *kurūn* — the *Kauravas*; पश्य *paśya* — please look at; इति *iti* — thus; उवाच *uvāca* — he said

Sañjaya said :

Oh King! Thus ordered by Arjuna, Lord Kṛṣṇa placed the best of chariots in the middle of the two armies, right in front of Bhīṣma, Droṇa, and all the rulers and spoke thus; 'Arjuna, please look at these Kauravas who have gathered here.'

श्लोकः १६, २७, २८.५

**तत्रापशयत् स्थितान् पार्थः पितॄनथ पितामहान्।**

**आचार्यान् मातुलान् भ्रातॄन्  पुत्रान् पौत्रान् सखींस्तथा।। २६।।**

**श्वसुरान् सुहृदश्चैव सेनयोरुभयोरपि।**

**तान् समीक्ष्य स कौन्तेयः सर्वान् बन्धून् अवस्थितान्।।२७।।**

**कृपया परयाविष्टः विषीदन्निदमब्रवीत्।**

तत्र  पार्थः उभयोरपि सेनयोः स्थितान् पितॄन् अथ पितामहान् आचार्यान्  मातुलान् भ्रातॄन् पुत्रान् पौत्रान् सखीन् तथा श्वसुरान् सुहृदः च एव अपशयत्। तान् सर्वान् अवस्थितान् बन्धून् समीक्ष्य सः कौन्तेयः परया कृपया आविष्टः सन् विषीदन् इदम् अब्रवीत् ।

अथ *atha* — then; सेनयोः उभयोः अपि *senayoḥ ubhayoḥ api* — on both sides of the two armies; स्थितान् *sthitān* — standing; पितॄन् *pitṝn* — paternal elders; पितामहान् *pitāmahān* — grandfathers; आचार्यान् *ācāryān* — teachers; मातुलान् *mātulān* — uncles; भ्रातॄन् *bhrātṝn* — brothers; पुत्रान् *putrān* — sons; पौत्रान् *pautrān* — grandsons; सखीन् *sakhīn* — comrades;

तथा *tathā* — and also; श्वशुरान् *śvaśurān* — fathers-in-law; सुहृदः च एव *suhṛdaḥ ca eva* — and friends too; पार्थः *pārthaḥ* — *Arjuna;* तत्र *tatra* — there; अपश्यत् *apaśyat* — saw

सः कौन्तेयः *saḥ kaunteyaḥ* — son of *Kuntī (Arjuna);* अवस्थितान् तान् सर्वान् *avasthitān tān sarvān* — all those who had assembled; बन्धून् *bandhūn* — relatives; समीक्ष्य *samīkṣya* — seeing clearly; परया कृपया *parayā kṛpayā* — by deep compassion; आविष्टः *āviṣṭaḥ* — (being) seized; विषीदन् *viṣīdan* — being sad; इदम् *idam* — this; अब्रवीत् *abravīt* — he said

Then, Arjuna saw standing there on both sides of the two armies, paternal elders, grandfathers, teachers, uncles, brothers, sons, grandsons, and fathers-in-law and friends too. Then he, the son of Kunti (Arjuna), seeing clearly all the assembled relatives, seized by deep compassion, sorrowfully said these (words).

तत्र (रथोत्तमस्य स्थापने कृते सति) पार्थः उभयोरपि सेनयोः स्थितान् पितृन् अथ (तथाशब्दपर्यायः) पितामहान् (भीष्मसोमदत्तादीन्) आचार्यान् (द्रोणकृपादीन्) मातुलान् (शल्यशकुनिप्रभृतीन्) भ्रातॄन् पुत्रान् (लक्ष्मणादीन्) पौत्रान् सखीन् (अश्वत्थामजयद्रथादीन्) तथा श्वसुरान् (दुर्योधनादीनां पत्नीनां जनकान्) सुहृदश्च (कृतवर्मभगदत्तादीन्) एव (एवशब्दाद् बन्धुभ्योऽन्यान् न अपश्यत्) अपशयत्। तान् सर्वान् अवस्थितान् बन्धून् समीक्ष्य स कौन्तेयः (कुन्त्याः अपत्यं द्व्यचः स्त्रीभ्यः ढक्) परया कृपया आविष्टः सन् विषीदन्निदमब्रवीत् श्रीकृष्णम् इति शेषः)।

श्लोकः २९-३०

**अर्जुन उवाच**

**दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम्। २८ ।।**

**सीदन्ति मम गात्राणि मुखं च परिशुष्यति ।**

**वेपथुश्च शरीरे मे रोमहर्षश्च जायते।। २९।।**

**गाण्डीवं स्त्रंसते हस्तात् त्वक्चैव परिदह्यते।**

**न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः।। ३०।।**

**निमित्तानि च पश्यामि विपरीतानि केशव।**

कृष्ण इमं युयुत्सुं समुपस्थितम् स्वजनं दृष्ट्वा (स्थितस्य) मम गात्राणि सीदन्ति । मुखं च परिशुष्यति । मे शरीरे वेपथुः च जायते । रोमहर्षः च (जायते) । हस्तात् गाण्डीवं स्रंसते । त्वक् च एव परिदह्यते। अवस्थातुं न च शक्नोमि। मे मनः भ्रमतीव च । केशव विपरीतानि निमित्तानि च पश्यामि।

अर्जुनः *arjunaḥ* — *Arjuna;* उवाच *uvāca* — said;
कृष्ण *kṛṣṇa* — Oh! *Kṛṣṇa*; युयुत्सुम् *yuyutsum* — desirous to fight; समुपस्थितम् *samupasthitam* — well stationed in battle position; इमम् *imam* — these; स्वजनम् *svajanam* — my own people; दृष्ट्वा *dṛṣṭvā* — seeing; मम *mama* — my; गात्राणि *gātrāṇi* — limbs; सीदन्ति *sīdanti* — have lost all their strength; मुखम् *mukham* — mouth; च *ca* — and; परिशुष्यति *pariśuṣyati* — has gone dry; मे *me* — my; शरीरे *śarīre* — in the body; वेपथुः *vepathuḥ* — trembling; रोमहर्षः *roma-harṣaḥ* — horripilation (hair standing on the end); च *ca* — and; जायते *jāyate* — has happened

हस्तात् *hastāt* — from (my) hand; गाण्डीवम् *gāṇḍīvam* — *Gāṇḍīva* (the bow of *Arjuna*); स्रंसते *sraṃsate* — slips; त्वक् *tvak* — skin; च *ca* —and; एव *eva* — indeed; परिदह्यते *paridahyate* — burns; न च शक्नोमि अवस्थातुम् *na ca śaknomi avasthātum* — I am not able to stand; मे *me* — my; मनः *manaḥ* — mind; च *ca* — and; भ्रमति इव *bhramati iva* — totally confused, as it were; केशव *keśava* —Oh! *Keśava*; विपरीतानि *viparītāni* — bad; निमित्तानि *nimittāni* — omens; च *ca* — and; पश्यामि *paśyāmi* — I see

Looking at these people, my own people, well stationed in battle position and desirous to fight, my limbs have lost all their strength, my mouth has gone dry, my body is trembling, and the hairs on my body are standing on end. The bow, Gandiva, slips from my hand and my skin also burns. I cannot stand up and my mind is totally confused as it were. Oh! Kesava, I see bad omens.

श्लोकः ३१-३२

**न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे।। ३१।।**

**न कांक्षे विजयं कृष्ण न च राज्यं सुखानि च।**

**किन्नो राज्येन गोविन्द किं भोगैर्जीवितेन वा।। ३२।।**

आहवे स्वजनम् हत्वा श्रेयः च न अनुपश्यामि । कृष्ण विजयं न कांक्षे । राज्यं च न (कांक्षे)। सुखानि च (न कांक्षे) । गोविन्द राज्येन नः किम् । भोगैः किम् । जीवितेन वा (किम्) ।

आहवे *āhave* — in the battle; स्वजनम् *svajanam* — one's own people; हत्वा *hatvā* — killing; श्रेयः *śreyaḥ* — any good; च *ca* — and; न *na* — not; अनुपश्यामि *anupaśyāmi* — I see

कृष्ण *kṛṣṇa* — Oh! *Kṛṣṇa*; विजयम् *vijayam*— victory; न काङ्क्षे *na kāṅkṣe* — I do not want; न च राज्यम् *na ca rājyam* — and not even the kingdom; सुखानि च *sukhāni ca* — nor

comforts; गोविन्द *govinda* — Oh! *Kṛṣṇa*; नः *naḥ* — for us; राज्येन *rājyena* — with a kingdom; किम् *kim* — what is (the use); भोगैः *bhogaiḥ* — with enjoyments; जीवितेन *jīvitena* — by living; वा *va* — even; किम् *kim* — what is (the use)

And I see no good in killing one's own people in this battle. Oh! Krishna, I want neither victory, nor the kingdom, nor comforts. Oh! Govinda, of what use are a kingdom, enjoyments, or even life to us?

श्लोकः ३३

**येषामर्थे कांक्षितं नः राज्यं भोगास्सुखानि च ।**

**त इमेवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च।। ३३ ।।**

येषामर्थे नः राज्यं कांक्षितं भोगाः (अस्माभिः कांक्षिताः) सुखानि च (अस्माभिः कांक्षितानि) ते इमे युद्धे प्राणान् धनानि च त्यक्त्वा अवस्थिताः (सन्ति) ।।

येषाम् अर्थे *yeṣām arthe* — for whose sake; नः *naḥ* — by us; राज्यम् *rājyam* — kingdom; काङ्क्षितम् *kāṅkṣitam* — was desired; भोगाः *bhogāḥ* — enjoyments; सुखानि *sukhāni* — pleasures; च *ca* — and; ते इमे *te ime* — those same people; प्राणान् *prāṇān* — life; धनानि *dhanāni* — wealth; च *ca* — and; त्यक्त्वा *tyaktvā* — abandoning; युद्धे *yuddhe* — in the battle; अवस्थिताः *avasthitāḥ* — have assembled

Those for whose sake the kingdom, enjoyments, and pleasures were desired by us, they have assembled in battle, having given up their wealth and their lives.

श्लोकः ३४-३५

**आचार्याः पितरः पुत्रास्तथैव च पितामहाः।**

**मातुलाः श्वशुराः पौत्राः श्यालाः सम्बन्धिनस्तथा।। ३४।।**

**एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन।**

**अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते।। ३५।।**

मधुसूदन आचार्याः पितरः पुत्राः तथा एव च पितामहाः मातुलाः श्वशुराः पौत्राः श्यालाः तथा सम्बन्धिनः घ्नतः अपि एतान् त्रैलोक्यराज्यस्य हेतोः अपि हन्तुम् न इच्छामि । महीकृते किं नु । (३४,३५)

(ते इमे *te ime* — these same people are); आचार्याः *ācāryāḥ* — teachers; पितरः *pitaraḥ* — paternal uncles; पुत्राः *putrāḥ* — sons; तथा एव च *tathā eva ca* — and so too; पितामहाः *pitāmahāḥ* — the grandfathers (like *Bhiṣma*); मातुलाः *mātulāḥ* — maternal uncles; श्वशुराः *śvaśurāḥ* — fathers-in-law; पौत्राः *pautrāḥ* — grandsons; श्यालाः *śyālāḥ* — brothers-in-law; तथा *tathā* — so too; सम्बन्धिनः *sambandhinaḥ*— other relatives, friends, and so on

मधुसूदन *madhusūdana* — Oh! *Kṛṣṇa*, the one who destroyed the demon named *Madhu*; एतान् *etān* — these; घ्नतः *ghnataḥ* — who are going to kill (me); न इच्छामि *na icchāmi* — I do not want; हन्तुम् *hantum* — to kill; अपि *api* — even; त्रैलोक्य-राज्यस्य हेतोः *trailokya-rājyasya hetoh* — for the sake of ruling over the three worlds; किम् नु *kim nu* — much less; महीकृते *mahīkṛte* — for this kingdom on earth

These people are teachers, paternal uncles, sons and also grandfathers, maternal uncles, in-laws, grandsons, cousins, other relatives, friends, and so on. Oh! Krishna, I do not want to kill these (people) who are about to kill me — not even for the sake of ruling over the three worlds, much less for this kingdom on earth.

श्लोकः ३६

**निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन।**

**पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः।। ३६।।**

जनार्दन एतान् धार्तराष्ट्रान् आततायिनः निहत्य (स्थितानाम्) नः का प्रीतिः स्यात् । हत्वा (स्थितान्) अस्मान् पापमेव आश्रयेत् ।। (३६)

जनार्दन *janārdana* — Oh! *Kṛṣṇa* (so called because he chastised those given to improper ways); धार्तराष्ट्रान् *dhārtarāṣṭrān* — sons of *Dhṛtarāṣtra*; निहत्य *nihatya* — destroying; नः *naḥ* — for us; का *kā* — what kind of; प्रीतिः *prītiḥ* — satisfaction; स्यात् *syāt* — would there be; एतान् *etān* — these; आततायिनः *ātatāyinaḥ* — wrongdoers; हत्वा *hatvā* — destroying; पापम् *papam* — sin; एव *eva* — only; अस्मान् आश्रयेत् *asman āśrayet* — would come to us

Oh! Krishna, what kind of satisfaction would there be for us by destroying these sons of Dhrtarashtra? Only sin would come to us by destroying these wrongdoers.

- मधुसूदन, जनार्दन इति संबुद्धिद्वयेन दुष्टराक्षसजनहननमेव तवापि सम्मतम्। न तु आचार्यादि-स्वजनहननम् इति सूचितम्

श्लोकः ३७

**तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान् स्वबान्धवान् ।**

**स्वजनं हि कथं हत्वा सुखिनः स्याम माधव।। ३७।।**

तस्मात् वयं धार्तराष्ट्रान् स्वबान्धवान् हन्तुं न अर्हाः । माधव कथं हि स्वजनं हत्वा सुखिनः स्याम

तस्मात् *tasmāt* — therefore; स्वबान्धवान् *svabāndhavān* — one's own relatives; धार्तराष्ट्रान् *dhārtarāṣṭrān* — the sons of *Dhṛtarāṣṭra*; हन्तुम् *hantum* — to kill; वयम् *vayam* — we; न अर्हाः *na arhāḥ* — not qualified; माधव *mādhava* — Oh! *Kṛṣṇa*; स्वजनम् *svajanam* — one's own people; हत्वा *hatvā* — having destroyed; कथम् हि *katham hi* — how indeed; सुखिनः *sukhinaḥ* — happy people; स्याम *syāma* — we would become

Therefore, we should not kill our own relatives, the sons of Dhrtarashtra. Having destroyed one's own people, Oh! Madhava, how would we be happy?

(दृष्ट्वेमं इत्यारभ्य आततायिनः इत्यन्तेन उक्ताद् हेतोः) तस्मात् वयं धार्तराष्ट्रान् स्वबान्धवान् हन्तुं न अर्हाः (योग्याः स्म) (अस्मदोः द्वयोश्च - बहुवचनं वा स्यात्, एकत्वे द्वित्वे च विवक्षिते) ) माधव (हे श्रीपते। मायाः विद्यायाः धवः पतिः। मा विद्या च हरेः प्रोक्ता तस्या ईशो यतो भवान्। तस्मान् माधवनामासि धवः स्वामीति शब्दितः ङरिवंश ३.८८.४९) (सिंहावलोकनन्यायेन पुनः समर्थयते) कथं स्वजनं हि हत्वा सुखिनः स्याम (न कथञ्चिदित्यर्थः)।।

श्लोकः ३८, ३९

**यद्यप्येते न पश्यन्ति लोभोपहतचेतसः।**

**कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम्।। ३८।।**

**कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्त्तितुम्।**

**कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन।। ३९।।**

जनार्दन यद्यपि एते लोभोपहतचेतसः कुलक्षयकृतं दोषं मित्रद्रोहे पातकम् च न पश्यन्ति (तथापि) कुलक्षयकृतं दोषं प्रपश्यद्भिः अस्माभिः कथं अस्मात् पापाद् निर्वर्त्तितुम् न ज्ञेयम्।

यदि अपि *yadi api* — even though; एते *ete* —these; लोभ-उपहत-चेतसः *lobha-upahata-cetasaḥ* — people whose minds are destroyed by greed; कुल-क्षय-कृत्तम् *kula-kṣaya-kṛtam* — born of the destruction of one's family; दोषम् *doṣam* — defect (sin); मित्रद्रोहे *mitra-drohe* — in the betrayal of one's friends; च *ca* — and; पातकम् *pātakam* — sin; न पश्यन्ति *na paśyanti* — do not see; जनार्दन *janārdana* — Oh! *Kṛṣṇa*; कुल-क्षय-कृतम् *kula-kṣaya-kṛtam* — born of the destruction of the family; दोषम् *doṣam — sin;* प्रपश्यद्भिः *prapaśyadbhiḥ* — by those who see very clearly; अस्माभिः *asmābhiḥ* — by us; अस्मात् पापात् *asmāt pāpāt* — from this sin; निर्वर्तितुम् *nivartitum* — to withdraw; कथम् न ज्ञेयम् *katham na jñeyam* — how is it not known

Although these people, whose minds are destroyed by greed, do not see the defect in the destruction of one's family and the sins of betraying one's friends, Oh! Janardana, how can it not be known by us, who know that sin is born of the destruction of the family, to withdraw from this sin?

श्लोकः ४०-४२

**कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः।**

**धर्मे नष्टे कुलं कृत्स्नं अधर्मोऽभिभवत्युत।।४०।।**

**अधर्माऽभिभवात् कृष्ण प्रदुष्यन्ति कुलस्त्रियः।**

**स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसङ्करः।। ४१।।**

**सङ्करो नरकायैव कुलघ्नानां कुलस्य च।**

**पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः।। ४२।।**

कुलक्षये सनातनाः कुलधर्माः प्रणश्यन्ति। धर्मे नष्टे अधर्मः कृत्स्नं कुलं अभिभवति उत । कृष्ण अधर्म-अभिभवात् कुलस्त्रियः प्रदुष्यन्ति । वार्ष्णेय स्त्रीषु दुष्टासु वर्णसङ्करः जायते । सङ्करः कुलघ्नानां कुलस्य च नरकाय एव (भवति)। एषां पितरः लुप्तपिण्डोदकक्रियाः पतन्ति हि।।

कुलक्षये *kulakṣaye* — when the family is destroyed; सनातनाः *sanātanāḥ* — the ancient; कुलधर्माः *kuladharmāḥ* — the *dharmas* of the family; प्रणश्यन्ति *praṇaśyanti* — they die; धर्मे नष्टे *dharme naṣṭe* — when the *dharma* is lost; अधर्मः *adharmaḥ* — *adharma*; कुलम् कृत्सनम् *kulam kṛtsnam* — the entire family; अभिभवति उत *abhibhavati uta* —will it not overwhelm?

कृष्ण *kṛṣṇa* — Oh! *Kṛṣṇa*; अधर्म-अभिभवात् *adharma-abhibhavāt* — due to the increase of *adharma*; कुलस्त्रियः *kulastriyaḥ* — the women in the family; प्रदुष्यन्ति *praduṣyanti* — will be given to improper ways; वार्ष्णेय *vārṣṇeya* — Oh! *Vārṣṇeya* (another name for *Kṛṣṇa*, meaning one who was born in the family of *Vṛsṇi*); स्त्रीषु दुष्टासु *strīṣu duṣṭāsu* — when the women become corrupt; वर्णसङ्करः *varṇasaṅkaraḥ* — the confusion of *varṇa* (societal groups); जायते *jāyate* — is born

सङ्करः *saṅkaraḥ* — confusion; कुलघ्नानाम् *kulaghnānām* — of the destroyers of the family; कुलस्य च *kulasya ca* — and of the family; नरकाय *narakāya* — for hell; एव *eva* — only; एषाम् *eṣām* — of these; पितरः *pitaraḥ* — ancestors; लुप्त-पिण्ड-उदक-क्रियाः *lupta-piṇḍa-udaka-kriyāḥ* — denied of their post-death rituals; पतन्ति *patanti* — fall; हि *hi* — indeed

When the family is destroyed, the ancient dharmas of the family die. When the dharma is lost, will not adharma overwhelm the entire family?

Oh! Krishna, due to the increase of adharma, the women in the family will be given to improper ways. When the women become corrupt, Oh! Varshneya, confusion is born in the society.

Confusion, indeed, leads the family and the destroyers of the family to hell. Their ancestors, denied of their post-death rituals, indeed fall.

श्लोकः ४३

**दोषैरेतैः कुलघ्नानां वर्णसङ्करकारकैः**

**उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः।। ४३।।**

वर्णसङ्करकारकैः एतैः दोषैः कुलघ्नानां शाश्वताः जातिधर्माः कुलधर्माः च उत्साद्यन्ते। (४३)

कुलघ्नानाम् *kulaghnānām* — of those who destroy the family; वर्ण-सङ्कर-कारकैः *varṇa-saṅkara-kārakaiḥ* — by that which creates confusion about *varṇa-dharma*, etc; एतैः *etaiḥ* — by these; दोषैः *doṣaiḥ* — by wrong actions; शाश्वताः *śāśvatāḥ* — perennial; जातिधर्माः *jātidharmāḥ* — the *dharmas* of the group (community); कुलधर्माः *kula-dharmāḥ*

— the *dharmas* pursued by the family; च *ca* — and; उत्साद्यन्ते *utsādyante* — are destroyed

By these wrong actions of those who destroy the family, creating confusion in the society, the perennial dharmas pursued by the family and the community are destroyed.

श्लोक: ४४

**उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन।**

**नरके नियतं वासः भवतीत्यनुशुश्रुम।। ४४**

जनार्दन उत्सन्नकुलधर्माणां मनुष्याणां नरके नियतं वासः भवति इति अनुशुश्रुम (श्रु श्रवणे १ प.प अनिट्) मोहावेशादेव लिटः उत्तमपुरुषप्रयोगः)।

जनार्दन *janārdana* — Oh! *Kṛṣṇa*; उत्सन्न-कुल-धर्माणाम् *utsanna-kula-dharmāṇām* — for those who have destroyed the family duty; मनुष्याणाम् *manuṣyāṇām* — for those men; नियतम् *niyatam* — as a rule; नरके *narake* — in hell; वासः *vāsaḥ* — a life; भवति *bhavati* — is; इति *iti* — thus; अनुशुश्रुम *anuśuśruma* — we have heard

We have heard, Oh! Janardana, that a life in hell is inevitable for those men who have destroyed the dharma of the family.

श्लोक: ४५

**अहो बत महत् पापं कर्त्तुं व्यवसिता वयम्।**

**यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः।। ४५।।**

अहो बत यत् राज्यसुखलोभेन स्वजनम् हन्तुं उद्यताः (तत्) महत् पापं वयम् कर्त्तुं व्यवसिताः (स्म)।

अहो बत *aho bata* — fie upon us; यत् *yat* — that; राज्य-सुख-लोभेन *rājya-sukha-lobhena* — due to greed for a kingdom and its pleasures; स्वजनम् *svajanam* — one's own people; हन्तुम् उद्यताः *hantum udyatāḥ* — ready to destroy; वयम् *vayam* — we; महत् पापम् *mahat-pāpam* — great sin; कर्तुम् व्यवसिताः *kartum vyavasitāḥ* — are determined to commit

Fie upon us! Ready to fight, we are determined to commit the great sin of destroying

our own people due to greed for a kingdom and its pleasures.

श्लोकः ४६

**यदि मामप्रतीकारं अशस्त्रं शस्त्रपाणयः।**

**धार्तराष्ट्रा रणे हन्युः तन्मे क्षेमतरं भवेत्।। ४६।।**

यदि अप्रतीकारं अशस्त्रं माम् शस्त्रपाणयः धार्तराष्ट्रा रणे हन्युः तत् (हननम्) मे क्षेमतरं भवेत् ।

यदि *yadi* — if; अप्रतीकारम् *apratīkāram* — one who does not retaliate; अशस्त्रम् *aśastram* — who is unarmed; माम् *mām* — me; शस्त्रपाणयः *śastra-pāṇayaḥ* — those with weapons in hand; धार्तराष्ट्राः *dhārtarāṣṭrāḥ* — the sons of *Dhṛtarāṣṭra*; रणे *raṇe* — in battle; हन्युः *hanyuḥ* — would kill; तत् *tat* — that; मे *me* — for me; क्षेमतरम् *kṣemataram* — better; भवेत् *bhavet* — will be

It will be better for me if the sons of Dhrtarashtra, with weapon in hand, were to kill me, who is unarmed and who does not retaliate.

आ.गिरि

(टि - स्वकीय) प्राणत्राणादपि प्रकृष्टो धर्मः प्राणभृतामहिंसा इति भावः।

श्लोकः ४७

**सञ्जय उवाच**

**एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत्।**

**विसृज्य सशरं चापं शोकसंविग्नमानसः।। ४७।।**

सञ्जय उवाच

(ततः किमर्जुनेन कृतम्) अर्जुनः एवम् (कृष्णम्) उक्त्वा संख्ये शोक(मोह)संविग्नमानसः (सन्) (शोकमोहाभ्याम् प्रकम्पितं मानसं यस्य) रथोपस्थे (पश्चात् भागे) सशरं (शरेण सहितं) चापं विसृज्य (सन्यासमेव श्रेयस्करमिति मत्वा) उपाविशत् (उपविवेश)

सञ्जयः उवाच *sañjayaḥ uvāca* — *Sañjaya* said;

अर्जुन: *arjunaḥ* — *Arjuna*; एवम् *evam* — in this manner; उक्त्वा *uktvā* — having spoken; सङ्ख्ये *saṅkhye* — in the middle of the battlefield; सशरम् *saśaram* — along with arrows; चापम् *cāpam* — the bow; विसृज्य *visṛjya* — putting aside; शोक-संविग्न-मानस: *śoka-saṃvigna-mānasaḥ* — with his mind completely overcome by sorrow; रथ-उपस्थे *ratha-upasthe* — on the seat of the chariot; उपाविशत् *upāviśat* — sat down

*Sañjaya* said: Having spoken in this manner in the middle of the battlefield, putting aside his bow and arrows, his mind completely overcome by sorrow, Arjuna sat down on the seat of the chariot.

ओं तत् सत्। इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादेऽर्जुनविषादयोगो नाम प्रथमोऽध्याय:।।

ओम् तत् सत् *om tat sat* — *Om, Brahman, is the only reality.*

इति *iti* — thus; श्रीमद्-भगवद्गीतासु *śrīmad-bhagavadgītāsu* — in the *Bhagavadgītā*; उपनिषत्सु *upaniṣatsu* — in the *Upaniṣads*; ब्रह्मविद्यायाम् *brahmavidyāyām* — in the knowledge of *Brahman*; योगशास्त्रे *yoga-śāstre* — in the *yoga-śāstra*; श्रीकृष्णार्जुनसंवादे *śrīkṛṣṇa-arjuna-saṃvāde* — in the dialogue between *Śrī Kṛṣṇa* and *Arjuna*; अर्जुन-विषादयोग: नाम *Arjuna-viṣāda-yogaḥ nāma* — called the '*Yoga* (topic) of *Arjuna's* Sorrow'; प्रथम: अध्याय: *prathamaḥ adhyāyaḥ* — first chapter

Thus ends the first chapter called Arjuna Vishada Yoga — The chapter of Arjuna's Sorrow — in the Bhagavad Gita, which is in the form of a dialogue between Sri Krishna and Arjuna, which is the essence of the upanishads whose subject matter is both the knowledge of Brahman and Yoga.

श्रियायुक्त: भगवान् श्रीभगवान् तेन गीता: उक्ता: । तासु। संसारशिथिलीकरणादि-गुणसादृश्यात् उपनिषत्वम् औपचारिकम् सिंहो माणवक: इतिवत्। यद्यपि अशोच्यान् इत्यारब्धस्य एव (ब्रह्मविद्यायोग) शास्त्रमिति व्यवहर्त्तव्यम् तथापि तदुपो□तित्वात् तदन्त:पातित्वम्।